श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीदिव्यदेशमङ्गळाशासनश्लोकाः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीदिव्यदेशमङ्गळाशासनश्लोकाः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

## *श्री सारसारम्*

( श्रीरङ्गम् )

विधिविहितसपर्यां वीतदोषानुषङ्गाम्
उपचितधनधान्यामुत्सवैः स्त्यानहर्षाम्।
स्वयमुपचिनु नित्यं रङ्गधामन् स्वरक्षां
शमितविमतपक्षां शाश्वतीं रङ्गलक्ष्मीम् ॥ १॥

## *श्री रहस्यनवनीतम्*

( वेङ्कटाद्रिः )

प्रशमितकलिदोषां प्राज्यभोगानुबन्धां
समुदितगुणजातां सम्यगाचारयुक्ताम्।
श्रितजनबहुमान्यां श्रेयसीं वेङ्कटाद्रौ
श्रियमुपचिनु नित्यं श्रीनिवास त्वमेव ॥ २॥

## *श्री तत्वनवनीतम्*

( काञ्चीपुरम् )

वरद विरचय त्वं वारिताशेषदोषां
पुनरुपचितपुण्यां भूषितां पुण्यकोटया।
सितमुदितमनोभिस्तावकैर्नित्यसेव्यां
हतरिपुजनयोगां हस्तिधाम्नः समृद्धिम् ॥ ३॥

## *तिरुनारायणपुरम्*

नवनवबहुभोगां नाथ नारायण त्वं
    विरचय दुरितौघैस्तामनाघ्रातगन्धाम्।
सहजसुलभदास्यैः सद्भिरभ्यर्थनीयां
    यतिपरिबृढहृद्यां यादवाद्रेः समृद्धिम् ॥ ४॥

## *श्री रहस्यपदवी*

श्रीरङ्गद्विरदवृषाद्रिपूर्वकेषु
    स्थानेषु स्थिरविभवा भवत्सपर्या।
आकल्पं वरद विधूतवैरिपक्षा
    भूयस्या भवदनुकम्पयैव भूयात् ॥ ५॥

॥ इति श्रीदिव्यदेशमङ्गळाशासनश्लोकाः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥